**Gyanshauryam, International Scientific Refereed Research Journal**
Available online at : www.gisrrj.com
OPEN ACCESS
© 2025 GISRRJ | Volume 8 | Issue 1 | ISSN : 2582-0095

# श्रीरामकृष्णकथामृते बन्धस्वरूपविचार:

**मलय दलुइ**
शोधछात्र:, अद्वैतवेदान्तविभाग:, राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:

**Article Info**
Volume 8, Issue 1
**Page Number :** 188-193

**Publication Issue :**
January-February-2025

**Article History**
Accepted : 20 Jan 2025
Published : 05 Feb 2025

**सारांश:**– अहङ्कारेण अभिभूत: पुरुष: लौकिकेषु वैदिकेषु च कर्मसु अतिशयेन आसक्तो भवति। अनुष्ठितं च कर्म यत् किमपि अङ्गहीनं भवति चेत् तेषां हृदये नानासंशय: उदेति। अत एव ते कर्माणि सर्वाङ्गरूपेण सम्पादयितुं सर्वदा यतन्ते। किन्तु प्रकृतिगुणसञ्जातक्रियाकलापेषु आत्मकर्तृत्वम् आरोप्य स्वीयं शुद्धबुद्धमुक्तस्वभावं विस्मरन्ति। एवं च प्राकृतिकगुणसमुत्पन्नस्य कर्मण: अहमेव कर्तेति मत्वा बद्धो भवतीति अहन्त्वबुद्धे: ममत्वबुद्धेश्च बन्धकारणत्वं सर्वै: आचार्यै: स्वीक्रियते।अत: मया **श्रीरामकृष्णकथामृते बन्धस्वरूपविचार:** इति शीर्षकमाश्रित्य शोधलेख: लिखित:

**विशेषशब्दा:**- दर्शनम्, श्रीरामकृष्ण:, बन्ध:, अद्वैतम्, द्वैतम्, आत्मा, अर्थ:, काम:, मोक्ष:, परमात्माइत्यादय:।

**प्रस्तावना**– सर्वेषां प्राणिनां वर्तते तावत् इयं कामना यत् सुखं मे भूयात् दु:खं मा भूत् इति। तदपि च सुखं सत्यभूतमेव स्यादिति सर्वे आशासते। असत्ये सुखे प्रेक्षावतां कामना न भवति। अत: न हि कश्चित् प्रेक्षावान् विषयसुखम् असत्यमिति विजानन् तत् सुखं वाञ्छति। अत: सत्यभूते सुखे एव प्रेक्षावतां कामना नियमत: सम्भवति।

एवं च किं सत्यं किं वा असत्यं येन सत्ये एव सुखे इच्छा भवति न असत्ये इति चेत् उच्यते यत् कदाचिदपि स्वस्वरूपात् यत् न व्यभिचरति तत् सत्यम्। यच्च कदाचित् अपि स्वस्वरूपात् व्यभिचरति तर्हि तत् असत्यम्। लोके ईदृशयो: एव सत्यासत्ययो: व्यवहार: वर्तते। लोके हि वचनं किमपि आलक्ष्य इदं सत्यम् असत्यं वेति विवेचयितुं भिन्नासु अवस्थासु प्रश्नादिभि: परीक्ष्य तत् यदि सर्वत्र एकरूपं तर्हि सत्यमिति गृह्यते। यदि तु कुत्रचित् व्यभिचरति तर्हि असत्यमिति निर्णीयते।

प्रकृते अपि सुखं सत्यम् असत्यं वेति ज्ञातुं तत् स्वरूपात् व्यभिचरति न वेति विवेचनीयम्। लौकिकं हि सुखं स्वीयात् स्वरूपात् व्यभिचरतीति दृष्टम्। यथा आकण्ठं भुक्तम् पायसं सुखं जनयति। तदेव यदि न जीर्णं भवति तर्हि महत् दु:खं जनयति। तथा च इदं विषयसुखम् एव दु:खाकारेण परिणमते इति वक्तव्यम्।

अत: विषयसुखस्य लौकिकस्य सर्वथा सत्यता नास्ति। तस्य स्वरूपात् व्यभिचारो दृश्यते। नापि धर्मादिजनितस्य कर्मफलरूपस्य सुखस्यापि सत्यता वर्तते, तुल्यादेव न्यायात्। अत: लौकिकम् अलौकिकं वा कारणायत्तं सुखं सत्यमिति निश्चेतुं न शक्यमिति।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited
a

अतः तादृशं सुखं वक्तव्यं यत् उक्तसत्यलक्षणेन उपेतं भवेत्। तादृशं च सुखं आत्मस्वरूपसुखमिति विवेचनीयम्। आत्मस्वरूपस्य अजायमानत्वात् तद्रूपस्य सुखस्यापि अजायमानत्वम् इति शास्त्रनिश्चयः। ततश्च स्वरूपात् अव्यभिचरत् सुखं भवति आत्मस्वरूपभूतं सुखम्। अत एव तत् सत्यमिति वस्तुस्थितिः।

अत एव "आनन्दं ब्रह्म..." इति श्रुतिः आत्मनः सुखरूपतां प्रख्यापयति। ब्रह्मशब्दस्य तावत् आत्मा इत्यर्थः। बृहत्त्वात् बृंहणत्वात् वा आत्मैव ब्रह्मेति गीयते। अत एव भाष्यकारः भगवच्छङ्करः "अथातो ब्रह्मजिज्ञासा" इति सूत्रव्याख्यानस्य प्रसङ्गे तत्पुनः जिज्ञास्यं ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यादिति आशङ्क्य ब्रह्म प्रसिद्धमेव इति निरूपणसन्दर्भे आह "आत्मा च ब्रह्म" इति। अतश्च आत्मनः सुखरूपत्वं श्रुतिन्यायाभ्यां प्रतिपन्नमिति सिद्धमेव। अत एव च आत्मनः निरुपाधिकप्रेमास्पदत्वमपि उपपन्नम्। उक्तं च श्रुतौ "आत्मनस्तु कामाय सर्वं प्रियं भवति" इति। अस्याः एव श्रुतेः भाष्ये भाष्यकारेण शङ्करेण एवमेव प्रतिपादितं यत् आत्मन्येव प्रीतिः मुख्या आत्मप्रीतिसाधनत्वात् अन्यत्र प्रीतिः गौणी इति।

अत्र च लौकिकं सुखं दुःखयोगात् दुःखमेव। अतः स्वरूपसुखम् एव वस्तुतः सुखमिति स्पष्टं प्रतिपादितमस्ति। प्रकरणे च अस्मिन् इतः अन्यैः अपि प्रकारैः आत्मनः सुखरूपत्वात् निरूपाधिका प्रीतिः तस्मिन् इति उपपादितमस्ति।

एवं च आत्मनः सुखरूपत्वे सिद्धे कुतः तादृशस्य सुखस्य अननुभव इति प्रश्नस्य उन्मेषे अवश्यमिदमेव वक्तव्यं यत् अज्ञानावरणात् इति। यथा लोके कण्ठगतस्यैव प्राप्तस्य हारस्य अप्राप्तिरिति अज्ञानमोहात् सम्भवति। एवमेव सिद्धस्यापि आत्मस्वरूपस्य असिद्धिरिव भवति अज्ञानेन इति वक्तुं शक्यते।

अतः इदं सिद्धं यत् अज्ञानं नाम किमपि वर्तते यत् आत्मस्वरूपभूतमपि सुखम् आच्छादयतीव। इदं च अज्ञानं सर्वेषां प्रत्यक्षमेव अस्ति। अहम् अज्ञः, गुरुणा उक्तम् अर्थं न जानामि इत्यादिप्रत्यक्षैः विषयीक्रियमाणत्वात्। अतः अस्य अपलापः केनचित् कर्तुं न शक्यते। एवं च लोके अपि भ्रमस्य कारणत्वेन अज्ञानं नाम किमपि वर्तते इति विज्ञायते। तच्च ज्ञाननिवर्त्यमित्यपि लोके प्रसिद्ध्यति। ज्ञानेन तत् अज्ञानं नष्टमिति पूर्वोक्तपुरुषस्य समाधानदर्शनात्। अतः लोके वेदे च न्यायतः अज्ञानं नाम किमपि वर्तते भ्रमाद्युपादानभूतं ज्ञाननिवर्त्यं चेति स्थितं भवति। अस्य अज्ञानस्य पर्यायपदानि भवन्ति नामरूपम्, अव्याकृतम्, प्रकृतिः, माया, अव्यक्तम्, तमः, महासुप्तिः, निद्रा इत्येवम्। अस्मादेव अज्ञानकारणात् अनात्मनि आत्मबुद्धिः कर्तृत्वबुद्धिश्च उदेति। अस्मादेव कारणात् भोगलालसा वर्धते। इयं भोगवासना च जीवान् जन्ममरणचक्रे बध्नाति। मनसि विषयासक्तिः एव बन्धनमिति ब्रह्मबिन्दूपनिषदि उक्तम्। तत्रोक्तं बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतमिति। वासनाबद्धो हि बद्धः वासनाक्षयो हि मोक्षः इति मुक्तिकोपनिषदि उक्तम्। देहे आत्मबुद्धिः बन्धकारणमिति तेजोबिन्दूपनिषदि उच्यते। विषयवासनायुक्ततृष्णा बन्धनमिति योगवासिष्ठरामायणे उक्तम्। सर्वविषयवासनातः मुक्तिरेव मुक्तिः इत्यपि तत्रैव सूचितम्। तृष्णा इत्युक्ते अत्र विषयवासनैव बुद्ध्यते। " भोगेच्छापि बन्धनम्, अतः जगति भोगेच्छात्यागेनैव मुक्तिः सम्भवतीति योगवासिष्ठे एव उक्तम्।" इदं बन्धनमेव जीवानां दुःखकारणमिति स्थितिः।

**श्रीरामकृष्णस्योपदेशः - जीवानां बन्धस्य मुक्तेश्च हेतुः स्वयम् ईश्वर एव। यावत्पर्यन्तं जीवोपाधिः अज्ञानम् अनुवर्तते तावत्पर्यन्तं तस्य अहन्त्वबुद्धिः तिष्ठति। अहङ्कारे विद्यमाने मुक्तिः न सम्भवति। अतः जीवानां कर्तृत्वबोधः एव बन्धस्य मुख्यं कारणम् इति परमहंसदेवस्य श्रीठाकुरस्य उपदेशः।**[1] ईश्वर एव कर्ता जीवः अकर्तेति विवेक एव ज्ञानम् इत्युच्यते। जीवाः एतत् सत्यं तत्त्वम् अनवगम्य बन्धने पतिताः भवन्ति। ईश्वर एव जीवानां हृद्देशे स्थित्वा तान् नियमयतीति **"ईश्वरः सर्वभूतानाम्..."**[2] इति गीतायामुच्यते। किन्तु मोहकारणात् तत्त्वमिदम् जीवाः अवगन्तुं न शक्नुवन्ति। जीवानाम् एवं

[1].कथामृत.- पुटम् 167। 9 10

[2].गीता.- 18.61।

कर्तृत्वबोधादेव सर्वविधविपत्तय: आरभन्ते। कर्तृत्वबोधकारणत: जीवानां विषयचिन्ता वर्धते। विषयासक्तिरेव जीवान् अनादिबन्धने पातयति। एवं बद्धजीवा: विषयभोगे आसक्ता: सन्त: अनन्ते बन्धने आबद्धा: भवन्ति। श्रीरामकृष्णेन अत्र उच्यते यत् संसार: जालवृत्त:, जीवास्तत्र मीना:। जालवृत्ते आबद्धा: पङ्के स्वात्मानं गोपयितुं यतमाना: इतोऽपि प निमग्ना: भवन्ति। कामिनीकाञ्चनेषु आसक्ता: संसारसागरे सुखिन: इति मत्वा तत्रैव रमन्ते। कामिनीकाञ्चनपदेन सर्वोऽपि विषयप्रपञ्च: अभिलक्ष्यते इति बोद्धव्यम्। बद्धजीवस्य वैशिष्ट्यं हि यदि स संसारत: अपसृत्य उत्तमपदे नियोज्यते तदा तु प्रबलसमुत्कण्ठया दु:खितो भवति। पुरीषकीट: पुरीषमयेषु वस्तुषु एव अतिशयं हर्षं लभते। तत्रैव अत्यन्तं हृष्टपुष्टो भवति। यदि स कीट ओदनभाण्डे स्थाप्यते तर्हि मरिष्यति। एवमेव बद्धजीवानां दशा लोके दृश्यते। संसारं त्यक्त्वा अल्पक्षणमपि साधुसङ्ग: तेभ्यो न रोचते। प्रस्तरे यथा जलं न प्रविशति तथैव बद्धजीवा: संसारिण: दु:खनाशकम् अध्यात्मतत्त्वं न शृण्वन्ति। मृदुलमृत्तिकायां किमपि चिह्नम् उत्पद्यते किन्तु प्रस्तरे न जायते। एवमेव भक्तहृदये एव ईश्वरचिन्तनं परिलक्ष्यते न तु पामरेषु संसारिजीवेषु इति श्रीरामकृष्णेनोपदिश्यते।

- **बन्धकारणनिर्देश:-** स्वस्वरूपाननुभव एव बन्ध:। स्वस्वरूपं च आत्मैव। अत: आत्मानवबोध एव बन्ध:। अयञ्च आत्मानवबोध: अज्ञानकारणात् जायते। अज्ञानकारणादेव जीवे कर्तृत्वबोध आगच्छति। कर्तृत्वबोधादेव विषयभोगाकाङ्क्षा उत्पद्यते। विषयाभोगासक्तित एव कर्मसु प्रवर्तते जीव:। अनुष्ठिचानि कर्माणि तु फलं जनयित्वैव उपशाम्यन्ति। एवं कर्मणां फलभोगार्थं जीव: जन्ममरणचक्रे आवर्तितो भवति। अस्मिन् अंशे बन्धकारणत्वेन विषयभोगाकाङ्का मुख्यतया आलोच्यते।
- **कर्तृत्वबुद्धि: विषयासक्तिश्च-** अहं कर्तेति बुद्धि: कर्तृत्वबुद्धि:। कर्तृत्वबुद्धिश्च अहं मनुष्य: अहं ब्राह्मण: इत्यादिबुद्धिपूर्विका। यावज्जना: अहं मनुष्य: तद्बुद्ध्युपेता: न भवन्ति तावन्न हि कर्मसु अधिकृता: भवन्ति। न वा कर्तारो भवन्ति। भेदबुद्धिं पुरस्कृत्यैव शास्त्रं कर्माणि शास्ति। अधिकृता: पुरुषा: अपि अहम् एतस्मिन् कर्मणि अधिकृत:, कर्ताहं, फलं चैतत् ईहे इति मत्वैव कर्मसु प्रवर्तन्ते। अहन्त्वबुद्ध्या च क्रियमाणेषु कर्मसु कर्मफलभोक्ता कर्ता एव भवति। यदि वा शुभं फलम् आहोस्वित् अशुभं फलं तु सुखदु:खाकारं तेनैव भौक्तव्यम्। तदर्थमेव तदुचितशरीरधारणम्। एवं हि कर्मचक्रे बद्धो जीव:।

कर्तृत्वबोधात् जायमाना विषयचिन्ता एव सर्वानर्थस्य मूलम्। विषयचिन्तात: एव आसक्ति: दृढा भवति। अत एव श्रीरामकृष्णेनोपदिश्यते यत् ईश्वरे भक्तिं परित्यज्य संसारे तिष्ठति चेत् विषयभोगेषु आसक्ति: उत्तरोत्तरं वर्धते एव इति। एवं विषयचिन्तात: मनुष्याणां मनसि अज्ञाततयैव कामक्रोधमोहादिकं उद्रिक्तं भवति। अत एव श्रीठाकुरेण कामिनीकाञ्चनमेव मायेति उपदिष्टम्।[3] विषयासक्तिं बोधयितुं कामिनीकाञ्चनमिति पदं व्यवहृतं श्रीठाकुरेण। कामिनीकाञ्चनेषु अधिककालं मनस्तिष्ठति चेत् नित्यानित्यवस्तुविवेकबोध: लुप्येत इति तेषाम् उपदेश:।

संसारे न केवलं कामस्य बाधा वर्तते। अत्र क्रोधोऽपि समानतया बन्धं जनयति। कामनाया: अपूरणे सति क्रोधो जायते। क्रोधाद् विचारबुद्धि: क्षीणा भवति। एवं विचारबुद्धे: ह्रासात् मनुष्याणां पुरुषार्थसिद्धि: न भवति इति गीतायामेव उच्यते बुद्धिनाशात्प्रणश्यतीति।

[3].कथामृत.– पुटम् 460।

कामिनीकाञ्चनं मदिरावत् विषयिणः मत्तं करोति। एवं मत्तस्य जनस्य चञ्चले मनसि भगवत्तत्त्वचिन्तनं न सम्भवति। विषयासक्तेभ्यः पुरुषेभ्यः सदुपदेशः, साधुसङ्गः, सर्वमपि विफलं भवति। अत एव श्रीठाकुरोपदेशो यत् विषयासक्तिः ईश्वरात् विमुखीकरोतीति।[4] एवमेव असंयतेन्द्रियस्य विषयासक्तस्य जनस्य अनन्तः दुःखभोगः लोके परिदृश्यते। **कामिनीकाञ्चनस्य भोगे आसक्तानां मनुष्याणां मनःशान्तिः नैव परिलक्ष्यते। अत एव श्रीरामकृष्णेनोक्तं यत् भोगे सत्येव योगह्रासो भवति। भोगसत्त्वे एव पुनः संसारतापः मानवान् तपति। कथामृतग्रन्थे विषयेऽस्मिन् काचित् कथा संस्मर्यते, तद्धि अवधूतः चिल्लखगं चतुर्विंशतिगुरुषु एकं गणयामास। कदाचित् चिल्लो मीनमुख आसीत्। अतः सहस्रवायसैः परिवृतोऽभवत्, चिल्लो मत्स्यमुखो यां दिशं याति काकाः पश्चात् तां दिशं काकारवेण गच्छन्ति। यदा चिल्लमुखात् स्वत एव सहसा मत्स्यः प्रास्खलत् तदा सर्वे वायसा मत्स्यं प्रति गताः, चिल्लं प्रति न पुनर्ययुः। तस्मिन् समये चिल्लखगेन ज्ञातं यत् मत्स्यः एव तादृशस्य अनर्थस्य कारणमासीदिति। अत्र मत्स्यो नाम भोग्यं वस्तु। काकाश्च भावना चिन्ता वेति विवेचयितुं शक्यते। एवं यत्रैव भोगः तत्रैव उद्वेगः चिन्ता च नियमेन वर्तते। भोगत्यागे सिद्धे एव शान्तिः इति श्रीठाकुरस्योपदेशः**[5]

जीवानां बन्धनस्य कारणं हि भवति कामिनीकाञ्चनमनादिविषयजातमिति उपपन्नम्।। कामिनीकाञ्चनेषु आसक्तिः जीवान् परमेश्वरचिन्तनतः विमुखीकरोति। कामिनीकाञ्चनमय एव अयं संसारः। संसारेऽस्मिन् कामिनीकाञ्चनस्य आवरणे नष्टे सति चिदानन्दलाभ इति श्रीरामकृष्णेन केदारनाथचट्टोपाध्यायविजयकृष्णगोस्वामि-प्रभृतिभ्यः विशिष्टभक्तेभ्य उपदिष्टम्।

विषयासक्तिरेव एव माया (बन्धः) इत्यपि श्रीरामकृष्णस्योक्तिः प्राप्यते। एतन्मायाकार्यं कामिनीकाञ्चनमपसृत्य यः ईश्वरं पश्यति स एव तं साक्षात्कुरुते। कामना एव अनर्थमूलमित्यस्मिन् विषये व्याख्यानं विधाय श्रीरामकृष्णेन उपदिष्टं यत् यदि कामना करणीया तर्हि भक्तिकामनैव वरणीयेति। अत्र भक्तिकामनायाः सत्त्वे दोषो नास्ति। भक्तिप्रार्थनं न मन्दम् अपि तु तदत्युत्तममित्युक्तं श्रीरामकृष्णेन। **मिष्टं मन्दं वस्तु, अम्लकारणं तत्, किन्तु इक्षुखण्डस्य मिष्टरूपत्वेऽपि तत् उपकाराय भवति तद्वत् अत्रापि बोध्यम्।**[6]एवं भक्तिलाभाय ज्ञानलाभाय मोक्षलाभाय च विद्यमाना कामना दोषाय न कल्पते।

जीवः मायाराज्ये वसति। माया च ईश्वरलाभाय विघ्नं जनयति। मायाकारणत एव मनुष्याः मूढवत् आचरन्ति। अत एव मायायाः फलं बन्धकारणं कामिनीकाञ्चनादि, कर्तृत्वबुद्धिः, अहंत्वबोध इत्येत् सर्वं विधिना परित्यक्तव्यमिति शास्त्रनिर्देशः।

जीवानां बन्धकारणं किमिति श्रीरामकृष्णोपदेशस्य अनुकूलतया कथामृतकारेण गीताश्लोकाः केचन उद्धृताः। तेषां श्लोकानां तात्पर्यं किञ्च तत्र श्रीरामकृष्णस्य उपदेश इदानीम् आलोच्यते।

बन्धस्वरूपविचाररूपे अस्मिन् प्रसङ्गे कथामृते उद्धृतानां गीताश्लोकानां श्रीशङ्कराचार्यनये विचारः इदानीम् उपस्थाप्यते। अविद्वान् पुरुषः कार्यकरणसङ्घाते अनात्मनि आत्मप्रत्ययवशात् कर्मसु प्रवर्तते। तेन रागद्वेषयोः च वशीभवति। कार्यकरणसङ्घाते अहमिति यः प्रत्ययः सोऽहङ्कार इत्युच्यते। सर्वशः प्रकृतेः क्रियमाणानि कर्माणि परन्तु अहङ्कारविमूढात्मा अहं कर्तेति मन्यते इति "प्रकृतेः क्रियमाणानि..." इत्यादिश्लोकस्यार्थः। अत्रोक्ता प्रकृतिः न हि तत्त्वान्तरं किन्तु मायैव। इयं हि सत्त्वादिगुणत्रयवती। प्रकृतौ त्रयः सत्त्वादिगुणाः सृष्टेः प्राक् साम्यावस्थायां भवन्ति। सृष्ट्युपक्रमे तु अस्याः गुणाः क्षुभ्यन्ते। स च गुणक्षोभः बुद्ध्यहङ्काररूपेण सृष्टिः इत्युच्यते।

---

[4].कथामृत.- पुटम् 459।

[5].तदेव.- पुटम् 459।

[6].तदेव.- पुटम् 622।

कार्यकरणरूपे सङ्घाते आत्मबुद्धिः अहङ्कारः इत्युक्तम्। एतेन प्रत्यगभिन्नं स्वरूपज्ञानं अहङ्कारः इति न गण्यते। एवम् अनात्मनि आत्मबुद्धिमान् स्थूलोऽहं काणोऽहं खिन्नोऽहमित्यादिबहुप्रकारं मोहं प्राप्तः जनः कार्यकरणधर्मा इत्युच्यते। अयं जनः कार्यकरणधर्मान् स्वात्मनि आरोपयति इत्यर्थः। अत एव स जनः कार्यकरणाभिमानी। कार्येषु करणेषु च ममेति अहमिति चाभिमानवान् भवति तादृशः पुरुषः। अत एव अविद्यया भ्रान्त्या स्वस्मिन् कर्माणि सन्तीति मन्यमानः कार्यकरणगतकर्मणां कर्ताऽहमिति मन्यते। कार्यकरणाकारपरिणतसत्त्वादि–प्रकृतिगुणत्रयक्रियमाणकर्माणि मूढः जीवः 'अहमेव करोमीति' मन्यते। देहे गते सति अहमेव गच्छामीति, चक्षुषा रूपदर्शने सति अहमेव पश्यामीति, मनसा च सङ्कल्प्यमाने सति अहमेव सङ्कल्पयामीति च देहादितादात्म्याध्यासात् भ्रान्त्या पुरुषो विषयजातं शुद्धे प्रत्यगात्मनि पश्यति इति श्लोकस्यास्य निष्कर्षः। एवमेव भ्रान्त्या देहात्मबुद्धेः बन्धपाशे जीवः आबद्धो भवति। अहङ्कार एव जीवान् बध्नातीत्यर्थः।

एवमेव भोगे ऐश्वर्ये च प्रणयवतां परमात्मचिन्तने निश्चयात्मिका बुद्धिः न स्थिरा जायते इति "भोगैश्वर्य..." इत्यादिश्लोके उच्यते। अत्र भोगैश्वर्यैः अभिनिविष्टान्तःकरणतादात्म्याध्यासवतां बहिर्मुखानां सकामकर्माचरणात् अज्ञानसागरे निमज्जनं भवति। अत्र भोगैश्वर्ययोः स्वतो भोगः पुरुषस्य नास्ति अभोक्तृत्वात्। भोक्तुः प्रत्यगात्मनश्च इतरेतराध्यासेनैव भोगः सम्भवति। एवम् भोगासक्तचित्ते निश्चयात्मिका बुद्धिः नोदेत्यतः वस्तुलाभार्थं प्रयत्नविरहितः अपि च लब्धवस्तुरक्षणार्थाकाङ्क्षाशून्यः परमेश्वराराधाननिष्ठः अप्रमत्तो वा भवेत् साधक इत्युच्यते गीतायाम्।

एवमेव शास्त्रे उच्यते न हि कश्चित् पुरुषः क्षणमपि अकर्मकृत् स्थातुम् अर्हति। सर्वथाऽपि प्रकृतिजैः गुणैः प्रेरितः प्रकृतिवशः एव कर्म करोतीति फलितार्थ आयाति। एवं यो विमूढात्मा कर्मेन्द्रियाणि संयम्य इन्द्रियार्थान् मनसा स्मरन् वर्तते स मिथ्याचार इत्युच्यते "कर्मेन्द्रियाणि..." इत्यादिश्लोके। भाषणग्रहणगमन–विसर्जनमैथुनाख्यानि पञ्च कर्माणि, तत्साधनानि वाक्पाणिपादपायूपस्थानि पञ्च कर्मेन्द्रियाणि। इन्द्रियविषयान् शब्दादीन् मनसा स्मरन् इत्यनेन तत्काले इन्द्रियार्थसन्निकर्षः न भवतीति सूच्यते। चक्षुः श्रोत्राभ्यां विषयग्रहणं न क्रियते इत्यपि व्यज्यते। अन्यथा चक्षुः श्रोत्राभ्यां रूपशब्दविषयग्रहणे सति मनसा तत्स्मरणानुपपत्तिः भवति। अनुभवजन्यसंस्कारजन्या हि स्मृतिः। एवम् एतादृशव्यवहारवान् जनः विमूढात्मा अज्ञ इत्युच्यते। प्राज्ञः कर्मेन्द्रियाणि संयम्य विषयान् न स्मरति। अज्ञस्तु कर्मेन्द्रियाणि संयम्यापि विषयान् स्मरन् वर्तते इति कृत्वा प्राज्ञाचारवद् अज्ञाचारोऽपि प्रामाणिकः इति न गृह्यते। अज्ञानां तादृशः आचारः सदा हेयः त्याज्य एव। अतः भाष्यकारेण तेषाम् अज्ञानां व्यवहारोऽयं हेयाचार इत्युक्तम्। विदुषाम् आचारवत् नैषाम् अविदुषाम् आचारोऽत्र ग्राह्यः। एवं मृषाचारः मनुष्याणां बन्धकारणं भवतीति श्रीशङ्कराचार्यस्य भाष्याशयः। अत्र यः साधकः इन्द्रियाणि नियम्य असक्तः सन् कर्मेन्द्रियैः कर्मयोगम् आरभते स विशिष्यत इति। इतरस्तु पापाचारो भवतीति भाष्यकारेण शङ्करेण सिद्धान्तितम्।

एवं मृषाचारः, अहन्त्वबुद्धिः, भोगैश्वर्यासक्तिश्च जीवानाम् अशेषदुःखकारणं भवतीति श्लोकत्रयभाष्यात् अवगम्यते।

**समीक्षणम्-** अहङ्कारेण अभिभूतः पुरुषः लौकिकेषु वैदिकेषु च कर्मसु अतिशयेन आसक्तो भवति। अनुष्ठितं च कर्म यत् किमपि अङ्गहीनं भवति चेत् तेषां हृदये नानासंशयः उदेति। अत एव ते कर्माणि सर्वाङ्गरूपेण सम्पादयितुं सर्वदा यतन्ते। किन्तु प्रकृतिगुणसञ्जातक्रियाकलापेषु आत्मकर्तृत्वम् आरोप्य स्वीयं शुद्धबुद्धमुक्तस्वभावं विस्मरन्ति। एवं च प्राकृतिकगुणसमुत्पन्नस्य कर्मणः अहमेव कर्तेति मत्वा बद्धो भवतीति अहन्त्वबुद्धेः ममत्वबुद्धेश्च बन्धकारणत्वं सर्वैः आचार्यैः स्वीक्रियते।

एवं च सकामकर्मपरायणानां मानवानां हृदये निश्चयात्मिका बुद्धिः किमर्थं नोदेतीति शङ्कायाम् उच्यते संसारे मनुष्याः प्रायशः अहङ्कारबुद्धिकारणादेव आपातमनोहरेषु विषयेषु सहसा आकृष्टाः भवन्ति। वेदे येषां क्रियाकलापानां व्यवस्था विधिबद्धा वर्तते तत्सर्वमपि सौरभशून्यकिंशुककुसुमवत् शोभामयमात्रम्। किन्तु अज्ञः अहन्तायुक्तो जनः तस्यां बाह्यशोभायां विमोहितो भवतीति लोके परिलक्ष्यते। ते क्रियाकलापाः अनित्यफलप्रदाः सन्तोऽपि जनमनसि निरतिशयं लोभं

जनयन्ति। अत एव हिताहितबोधविहीनः मानवगणः सहसा तस्मिन् प्रवृत्तो भवति। क्रियाविशेषाणाम् अनुष्ठानेन मानवानां मनः विषयासक्तं भवति। अत एव मनुष्याणां विवेकः समाच्छन्नः तिष्ठति। एतादृशस्य जनस्य सकामकर्मानुष्ठानरतस्य बुद्धिः परमात्मचिन्तने लीना न भवतीति शङ्करप्रभृतयः आचार्याः सिद्धान्तं कुर्वन्ति। अत्रास्मिन् प्रसङ्गे श्रीरामकृष्णस्योपदेशोऽपि तेषाम् आचार्याणां राद्धान्तमेव अनुसरति।

निष्कामकर्म आचरन् सन्न्यासग्रहणपूर्वकं ध्यानेन चित्तशुद्धिं सम्पाद्य क्रमेण मुक्तिपदं प्राप्नोति साधक इति शास्त्रे उपलभ्यते। परन्तु केवलं सन्न्यासमात्रम् अवलम्ब्य अशुद्धान्तःकरणो जनः कदापि सिद्धिं नाप्नोतीत्यपि शास्त्रवचनम्। एवं नित्यानित्यवस्तुविवेकेन यस्य अन्तःकरणं न शुद्धं सोऽनन्ते दुःखसागरे निमग्नो भवतीति विद्वांसो वदन्ति। बाह्यकर्मपरित्यागपूर्वकं निमीलितनेत्रो ध्याननिमग्नः सन्न्यासी मनसा विषयान् स्मरति चेत् सन्न्यासस्य मोक्षरूपं फलं न कदाचिदपि प्राप्नोतीत्येव कर्मेन्द्रियाणीत्यादिश्लोकस्य गूढार्थः।

श्रीमद्रामानुजाचार्येण यदुक्तम् अन्यथा सङ्कल्प्य अन्यथा आचरतीति मिथ्याचार इति तन्न युक्तम्। नाहं कर्म कुर्वे इति सङ्कल्प्य नैव कर्म कृतवान् अयमज्ञः इति कथमस्य तादृशमिथ्याचारत्वप्रसङ्गः ? न हि मनसा विषयस्मरणं कर्म, येन अस्य सङ्कल्पविपरीतः स्यादाचारः। न च ज्ञानयोगं कुर्वे इति सङ्कल्प्य मनसा विषयस्मरणात् अस्ति मिथ्याचारत्वम् अस्य इति वाच्यम्। अज्ञस्य ज्ञानयोगसङ्कल्पस्यैव असम्भवात्। ज्ञानपूर्वको योग इति ज्ञानयोगः। एवं च न हि कश्चित् इत्याद्यारभ्य कर्मयोगस्यैव प्रकृतत्वेन ज्ञानयोगसङ्कल्पस्य अत्र असङ्गतत्वात्। यस्त्विन्द्रियाणीति परवर्तिनि श्लोके कर्मयोगस्यैव इन्द्रियनियमनपूर्वकं प्रपञ्चितत्वात् कथनमिदं न युक्तम् इति स्थितिः।

**परिशीलतग्रन्थसूची**


1. अद्वैतसिद्धिः बालबोधिन्याख्यया व्याख्ययोद्भासिता प्रथमो भागः, सम्पादकः, शीतांसुशेखरवागची, वाराणसीः रत्ना पब्लिकेशन्स, 2000.
2. बङ्गीया ग्रन्थाः प्रबन्धाश्च, ओंकारानन्द, स्वामी. "ब्रह्म ओ शक्ति अभेद "उद्बोधन, 66 वर्ष, 5- संख्या (1964) : पृ. 227-232.
3. ब्रह्मसूत्रशाङ्करभाष्यम्. सम्पादकौ अनन्तकृष्णशास्त्री &वासुदेवशर्मा, नई दिल्ली : राष्ट्रिय संस्कृत संस्थान, 2012.
4. मन्त्रपुष्पम् . परिष्कर्ता- स्वामी देवरूपानन्दः, तृतीय संस्करण, खार, मुम्बईः रामकृष्ण मठ, 2007.
5. वेदव्यासः. महाभारत. गीताप्रेस : गोरखपुर, 2008.
6. वेदान्तपरिभाषा, धर्मराजाध्वरीन्द्रः व्याख्याकारः श्रीगजाननशास्त्रीमुसलगांवकर, वाराणसीः चौखम्बा विद्याभवन, 2006.
7. श्रीमद्भगवद्गीता : शाङ्करभाष्य हिन्दी अनुवाद सहित. गीताप्रेस : गोरखपुर, 2008.
8. श्रीरामकृष्ण ओ स्वामी विवेकानन्देर दार्शनिक भावना. भजनानन्द, स्वामी. अनुवादकशौटीर किशोर चट्टोपाध्याय, हाओड़ा रामकृष्ण मिशन् विवेकानन्दविश्वविद्यालय, 2011.
9. श्रीश्रीरामकृष्णकथामृतप्रसङ्गः, स्वामी. भूतेशानन्द,षष्ठ खण्ड, कलकाता : उद्बोधन कार्यालय, 1995.
10. सदानन्दः. वेदान्तसारः- हिन्दीव्याख्यासहितः व्याख्याकारः बदरीनाथशुक्लः, दिल्ली : मोतीलाल बनारसीदास, 2009.
11. स्तवनाञ्जलिः तृतीय संस्करण, नागपुर : रामकृष्ण मठ, 2008.